(यथा, महाभारते । १ । ११५ । १२ ।
"ततो जज्ञे मांसपेशी लोहाष्ठीलेव संहता ॥")

मांसफला, स्त्री, (मांसमिव फलमस्याः ।) वार्त्ताकी । इति राजनिर्घण्टः ॥

मांसभक्षः, त्रि, (मांसं भक्षयतीति । भक्ष + "कर्म्मण्यण् ।" ३।२।१। इत्यण् ।) मांसभक्षणकर्त्ता । मांसं भक्षयतीति छात् षष्ठीति कर्म्मणि षण्प्रत्ययेन निष्पन्नः ॥ (दानवविशेषः । यथा, हरिवंशे भविष्यपर्व्वणि । २३२ । ६ ।
"मांसपो मांसभक्षश्च वेगवान् केतुमानृविः ॥")

मांसमाषा, स्त्री, माषपर्णी । इति राजनिर्घण्टः ॥

मांसरोहिणी, स्त्री, (मांसं रोपयतीति । रुह + णिच् + णिनिः । ङीप् । न पुक् ।) सुगन्धिद्रव्यभेदः । तत्पर्य्यायः । अग्निरुहा २ वृत्ता ३ चर्म्मकषा ४ वसा ५ विकषा ६ मांसरोही ७ । अस्या गुणाः । वृष्यत्वम् । सारकत्वम् । दोषत्रयनाशित्वञ्च । इति राजनिर्घण्टः ॥ (तथाचास्याः पर्य्यायो गुणाश्च ।
"मांसरोहिण्यतिरुहा वृत्ता चर्म्मकरी कृशा ।
प्रहारवल्ली विकशा वीरवत्यपि कथ्यते ॥
स्यान्मांसरोहिणी वृष्या सरा दोषत्रयापहा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मांसलं, क्ली, (मांसं तद्वत् पुष्टिकरो गुणोऽस्त्यस्यास्मिन् वा । मांस + "सिध्मादिभ्यश्च ।" ५ । २ । ९७ । इति लच् ।) काव्यस्य गौडीरीत्यन्तर्गतस्य ओजोगुणस्याङ्गविशेषः । यथा,—
"ओजः समासभूयस्त्वं मांसलं पदडम्बरम् ॥"
इति काव्यचन्द्रिका ॥

मांसलः, त्रि, (अतिशयमांसमस्त्यस्येति । मांस + "सिध्मादिभ्यश्च ।" ५ । २ । ९७ । इति लच् ।) बलवान् । इत्यमरः । ३ । ६ । ४४ । स्थूलः । यथा, गारुड़े ६६ अध्याये ।
"निम्नाश्च बहुरेखाः स्युर्निर्द्धनाश्चिबुकैः कृशैः ।
मांसलैश्च घनोपेतैरवक्रैरधरैर्नृपाः ॥"
(मांसयुक्तः । यथा, बृहत्संहितायाम् । ६८ । २८ ।
"हृदयं समुन्नतं पृथु न वेपनं मांसलञ्च नृपतीनाम् ॥"
अतिबहुलः । यथा, नैषधे । ६ । २७ ।
"इतस्य हंसावलिमांसलश्रियो
बलाकयेव प्रबला विड़म्बना ॥")

मांसलफला, स्त्री, (मांसलं फलमस्याः ।) वृन्ताकी । इति राजनिर्घण्टः ॥

मांसविक्रयी, [न्] त्रि, (मांसविक्रयोऽस्यास्तीति । मांसविक्रयेण जीवति वेति इनिः ।) आमिषविक्रयकर्त्ता । इति हलायुधः ॥ तत्पर्य्यायः । वैतंसिकः २ कौटिकः ३ मांसिकः ४ । इत्यमरः । २ । १० । १४ ॥ शौनिकः ५ । इति जटाधरः ॥ कौटकिकः ६ । इति शब्दरत्नावली ॥ (यथा मनौ । ३ । १५१ ।
"चिकित्सकान् देवलकान् मांसविक्रयिणस्तथा ।
विपणेन च जीवन्तो वर्ज्याः स्युर्हव्यकव्ययोः ॥")

मांससारः, पुं, (मांसस्य सारः ।) मेदः । इति राजनिर्घण्टः ॥ (मांसेष्वपि सारो बलं यस्य । सबलस्थूलकायः । यथा, बृहत्संहितायाम् ।६८।१००।
"उपचितदेहो विद्वान् धनी सुरूपश्च मांससारो यः ।
सकलात इति च सुश्लिष्टसन्धितासुखभुजो ज्ञेयाः ॥")

मांसस्नेहः, पुं, (मांसानां स्नेहः ।) मेदः । इति राजनिर्घण्टः ॥

मांसहासा, स्त्री, (मांसेन हासः प्रकाशो यस्याः ।) चर्म्म । इति शब्दरत्नावली ॥

मांसाष्टका, स्त्री, (मांसेन सम्पाद्या अष्टका । मांसप्रधाना अष्टका वा ।) गौणचान्द्रमाघकृष्णाष्टमी । तत्र मांसोपकरणकश्राद्धमावश्यकम् । यथा : अथाष्टकाश्राद्धम् ।
"पित्र्यदानाय मूले स्युरष्टकास्त्रिस एव च ।
कृष्णपक्षे वरिष्ठा हि पूर्व्वा चैन्द्री विभाव्यते ॥
प्राजापत्या द्वितीया स्यात् तृतीया वैश्वदेविकी ।
आद्या पूपैः सदा कार्य्या मांसैरन्या भवेत्तथा ॥
शाकैः कार्य्या तृतीया स्यादेष द्रव्यगतो विधिः ॥"
मूले प्रधानस्थाने । अमावास्या हि श्राद्धस्य प्रधानकालः तद्वदिति यावत् । ऐन्द्री सामेन्द्रदेवताकयागसम्बन्धात् । एवं प्राजापत्या वैश्वदेवकी च । मांसैः पशोः । तथा च गोभिलः । यद्युवाल्पतरसंभारः स्यात् तदा पशुनैव कुर्य्यादिति । यद्युवेति निपातसमुदायो यद्यर्थे । पशुरपि छाग एव । छागोऽनादेशे पशुरिति गोतमात् । न च तेष्या ऊर्द्ध अष्टम्यां गौरिति गोभिलसूत्रेण गवोपदेशात् कथमनुपदिष्टत्वमिति वाच्यम् । तदसम्भवे पशुनेत्यनेन यः पशुरुपदिष्टस्तस्य विशेषतोऽनुपदिष्टत्वात् । वस्तुतस्तु हरिवंशे मृगोऽपि विहितः ।
"इक्ष्वाकुस्तु विकुक्षिं वै अष्टकायामथादिशत् ।
मांसमानय श्राद्धाय मृगं हत्वा महाबल ! ॥'
इत्यादिना मृगमांसबोधनात् ॥ पश्वभावे स्थालीपाकेन । यथा, गोभिलः । अपि वा स्थालीपाकं कुर्व्वीतेति । तद्विधानन्तु ।
"स्थालीपाकं पशुस्थाने कुर्य्याद्यद्यानुकल्पिकम् ।
श्रपयेत्तं सवत्सायास्तरुण्या गोः पयस्यनु ॥"
इति छन्दोगपरिशिष्टीयं ग्राह्यम् ॥ अन्विति ओदनचरोः पश्चात् । अतएव ।
"पितरः स्पृहयन्त्यन्नमष्टकासु मघासु च ।
तस्माद्दद्यात् सदा युक्तो विद्वत्सु ब्राह्मणेषु च ॥"
इति शातातपेनोक्तम् ॥ तस्मादन्नं प्रधानं पूपादिकन्तु उपकरणत्वेन शक्तानामावश्यकं सदेति श्रवणात् । इति श्राद्धतत्त्वम् ॥

मांसिकः, पुं, (मांसाय प्रभवति "तस्मै प्रभवति सन्तापादिभ्यः ।"५। १। १०१ । इति । मांस + ठञ् । मांसेन जीवतीति ठञ् वा । मांसं पण्यमस्य । "तदस्य पण्यम् ।"४।४ । ५१ । इति ठक् वा । अथवा, मांसं नियुक्तमस्मै दीयते । इति "श्राणामांसौदनाट्टिठन् ।"४। ४ । ६७ । इति टिठन् ।) मांसविक्रयी । इत्यमरः ।२।१०।१४॥

मांसिनी, स्त्री, (मांसवत् पदार्थोऽस्यामस्तीति । इनिः । ङीप् ।) जटामांसी । इति राजनिर्घण्टः ॥

मांसी, स्त्री, (मांसवत् पदार्थोऽस्यास्यामिति । मांस + अर्शआदित्वादच् । गौरादित्वात् ङीष् ।) जटामांसी । ककोली । इति मेदिनी । से, ८ । मांसच्छदा । इति राजनिर्घण्टः ॥ (यथा, वैद्यकरत्नमालायाम् ।
"नलदं नन्दिनी पेषी मांसी लघुजटा जटी ॥")

मांसेष्टा, स्त्री, (मांसमिष्टं प्रियमस्याः ।) वल्गुली । इति राजनिर्घण्टः ॥

माकन्दः, पुं, (मातीति । मा + क्विप् । माः परिमितः सुघटितः कन्द इव फलमस्य ।) आम्रवृक्षः । इति मेदिनी । दे, ३८ ॥ (यथा, गीतगोविन्दे ।
"माकन्द ! क्रन्द कान्ताधर ! धरणितलं गच्छ यच्छन्ति यावद्
भावं शृङ्गारसारस्वतमिह जयदेवस्य विष्वग्वचांसि ॥"
तथास्य पर्य्यायः ।
"आम्रः प्रोक्तो रसालश्च सहकारोऽतिसौरभः ।
कामाङ्गो मधुदूतश्च माकन्दः पिकवल्लभः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

माकन्दी, स्त्री, (माकन्द + ङीष् ।) आमलकी । नगरभेदः । इति मेदिनी । दे, ३८ ॥ (यथा, महाभारते । ५ । ७२ । १५ ।
"————————पञ्चयामा वृता मया ।
अविस्थलं वृकस्थलं माकन्दीं वारणावतम् ।
अवसानञ्च गोविन्द ! कञ्चिदेवात्र पञ्चमम् ॥")
पीतचन्दनम् । इति शब्दमाला ॥ मामाखी इति माङ्गनी इति च हिन्दी भाषा । तत्पर्य्यायः । बहुमूली २ मादनी ३ गन्धमूलिका ४ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । मधुरत्वम् । दीपनत्वम् । रुच्यत्वम् । अल्पवातकारित्वम् । पथ्यत्वम् । व्रणेषु न हिताधिकत्वञ्च । एका विशदमूली च श्यामला च तथापरा । इति राजनिर्घण्टः ॥

माकरी, स्त्री, (मकरयुक्ता पौर्णमास्यत्रेति । मकर + अण् + ङीष् ।) माघशुक्लसप्तमी । अत्र स्नानादिविधिर्यथा । भविष्ये ।
"सूर्य्यग्रहणतुल्या हि शुक्ला माघस्य सप्तमी ।
अरुणोदयवेलायां तस्यां स्नानं महाफलम् ॥
माघे मासि सिते पक्षे सप्तमी कोटिभास्करा ।
दद्यात् स्नानार्घ्यदानाभ्यामायुरारोग्यसम्पदः ॥
अरुणोदयवेलायां शुक्ला माघस्य सप्तमी ।
गङ्गायां यदि लभ्येत सूर्य्यग्रहशतैः समाः ॥"
कोटिभास्करा कोटिसप्तमीतुल्या सप्तम्या भास्करदेवताकत्वात् । सूर्य्यग्रहणफलं स्नानजम् । सन्निहिते बुद्धिरन्तरङ्गेतिन्यायात् । तेन बहुशतसूर्य्यग्रहणकालीनगङ्गास्नानजन्यफलसमफलमत्र ज्ञेयम् ॥ * ॥ स्नानपरिपाटी